# श्री महालक्ष्म्यष्टकं

**। इंद्र उवाच ।**

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शंखचक्र गदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥ 1

नमस्ते गरुडारूढे कोलासुर भयंकरि ।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥ 2

सर्वज्ञे सर्ववरदे सर्व दुष्ट भयंकरि ।
सर्वदुःख हरे देवि महालक्ष्मि नमोऽस्तु ते ॥ 3

सिद्धि बुद्धि प्रदे देवि भुक्ति मुक्ति प्रदायिनि ।
मंत्रमूर्ते सदा देवि महालक्ष्मि नमोऽस्तु ते ॥ 4

आद्यंत रहिते देवि आदिशक्ति महेश्वरि ।
योगज्ञे योगसंभूते महालक्ष्मि नमोऽस्तु ते ॥ 5

स्थूल सूक्ष्म महारौद्रे महाशक्ति महोदरे ।
महापाप हरे देवि महालक्ष्मि नमोऽस्तु ते ॥ 6

पद्मासन स्थिते देवि परब्रह्म स्वरूपिणि ।
परमेशि जगन्मातः महालक्ष्मि नमोऽस्तु ते ॥ 7

© 2022 Vedam Nadam

श्वेतांबरधरे देवि नानालंकार भूषिते ।
जगस्थिते जगन्मातः महालक्ष्मि नमोऽस्तुते ॥ 8

महालक्ष्मष्टकं स्तोत्रं यः पठेद्भक्तिमान्नरः ।
सर्वसिद्धि मवाप्नोति राज्यं प्राप्नोति सर्वदा ॥ 9

एककाले पठेन्नित्यं महापाप विनाशनम् ।
द्विकालं यः पठेन्नित्यं धन धान्य समन्वितः ॥ 10

त्रिकालं यः पठेन्नित्यं महाशत्रु विनाशनम् ।
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥ 11

॥ इति इंद्रकृत श्रीमहालक्ष्म्यष्टक स्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam